**आदर्श-प्रश्नपत्रम्**

**संस्कृतम् (केन्द्रिकम्) कोड् सङ्ख्या 322**

**कक्षा – द्वादशी**

**समयः – होरात्रयम्** **अङ्कयोजना उत्तरसङ्केताश्च** **पूर्णाङ्काः – 80**

**अवधातव्यम् -**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा अनुवादकार्ये पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि षड् वाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्। **(अयं नियमः एकादश्यां कक्षायाम् अपि पालनीयः।)**
3. श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

| | | |
|---|---|---|
| | **खण्डः – क**<br>**अपठित – अवबोधनम् - 10 अङ्काः** | |
| **1.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत -** | **10** |
| | **(अ) एकपदेन उत्तरत - केवलं प्रश्नद्वयम्** | **1×2=2** |
| | (i) भोजराजः<br>(ii) मीरा<br>(iii) कूडकी-ग्रामे | |
| | **(आ) पूर्णवाक्येन उत्तरत - केवलं प्रश्नद्वयम्** | **2×2=4** |
| | (i) विक्रमः मीरां हन्तुं पुष्पहारेण सह सर्पं प्रेषितवान्। अन्येद्युः तस्याः जीवनलीलां | |

| | | |
|---|---|---|
| | समापयितुं विषपूरितं चषकं प्रेषयत्।<br>(ii) वैधव्यकाले मीरायाः समयः विशेषतः कथाकीर्तनयोः पूजापाठयोः हरिचर्यायां च व्यतीतो भवति स्म।<br>(iii) मीरायाः देवरः मीरां हन्तुं सर्पं विषमिश्रितं चषकं च प्रेषितवान् परं न तु सर्पः ताम् अदशत् अपि च विषमपि तस्याः कृते अमृतमिव जातं तस्मात् मीरायाः विश्वासः कृष्णभक्तौ दृढात्दृढतरोऽभवत्। | |
| | | |
| | **(इ) अनुच्छेदस्य (द्वित्रिशब्दात्मकं) समुचितं शीर्षकं लिखत।**<br>मीरा, कृष्णभक्तमीरा, कवयित्री मीरा<br>अन्ये अपि शीर्षकाः भवितुम् अर्हन्ति। | 1×1=1 |
| | | |
| | **(ई) यथानिर्देशम् उत्तरत- केवलं प्रश्नत्रयम्** | 1×3=3 |
| | (i) (ख) विक्रमाय<br>(ii) (घ) रोचते स्म<br>(iii) (ग) नानाविधैः<br>(iv) (ख) विषम् | |
| | **खण्डः – ख**<br>**रचनात्मक–कार्यम् - 15 अङ्काः** | |
| 2. | **भवान् स्वागतः। प्लास्टिक् इत्यस्य प्रयोगः पर्यावरण-नाशकः इति विषयम् अधिकृत्य मित्रम् सञ्चितं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत।** | ½×10=5 |
| | यूजी-01, संस्कृतिभवनम्<br>(i) **नवदिल्लीतः**<br>दिनाङ्क : 12 अप्रैल, 2024<br><br>प्रिय मित्र (ii) **सञ्चित** !<br>सस्नेहं (iii) **नमस्ते**<br><br>अत्र कुशलं तत्रास्तु। ह्यः एव मम विद्यालये 'त्यज प्लास्टिक् रक्ष पर्यावरणम्' इति विषये एका गोष्ठी अभवत् । अत्रैव मया प्रथमवारं (iv) **ज्ञातं** यत् प्लास्टिक् इत्यस्य परिणामाः दूरगामिनः घातकाश्च भवन्ति। अन्यानि सर्वाणि वस्तूनि मृत्तिकायां विनश्य विलीयन्ते परं (v) **प्लास्टिक्** तु कदापि न अपक्षीयते। न इदं गलति न च विलीयते। एवं प्लास्टिक् इत्यस्य प्रयोगेण (vi) **पर्यावरणस्य** कृते महती क्षतिः भवति। परं वयं प्रातः जागरणात् आरभ्य रात्रौ निद्रापर्यन्तं प्लस्टिक् इत्यस्य विविधवस्तूनां प्रयोगं (vii) **कुर्मः**। किमधिकम् इयं लेखनी यया अहं लिखामि, अस्याः च पुनःपूरणी प्लाष्टिक्-निर्मिता। कल्पयामि यदि एवमेव प्लास्टिक् इत्यस्य प्रयोगः वर्धिष्यते तर्हि किं भविष्यति ? वस्तुतः पर्यावरणस्य (viii) **रक्षणे** एव अस्माकं | |

| | | |
|---|---|---|
| | रक्षणम्। आशासे त्वमपि जागरूकः भूत्वा अन्येभ्यः अपि प्रेरणां प्रदास्यसि। गृहे (ix) पितृभ्यां मम प्रणामाः निवेदनीयाः।<br><br>भवतः अभिन्नमित्रम्<br>(x) **स्वागतः**<br><br>**मञ्जूषा**<br>कुर्मः, ज्ञातम्, प्लास्टिक्, पितृभ्याम्, सञ्चित, नवदिल्लीतः, पर्यावरणस्य, रक्षणे, नमः, स्वागतः। | |
| 3. | **मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -** | ½×10=5 |
| | एकः कश्चन महात्मा आसीत्। सः नित्यं (i) **ईशस्तुत्यां** लग्नः एकस्मिन् आश्रमे निवसति स्म। भक्ताः तं महात्मानं मेलितुम् आगच्छन्ति स्म। ते स्वसमस्याः अपि यदा कदा (ii) **महात्मानं** कथयन्ति स्म। महात्मा अपि यथासामर्थ्यं तासां समाधानं सूचयति स्म। एकदा एका वृद्धा महिला महात्मानम् आगत्य (iii) **प्रार्थितवती** यत् अयं मम पौत्रः। एषः गुडस्य अत्यधिकं सेवनं करोति। कृपया भवान् एनं बोधयतु। महात्मा अवदत् यत् एकसप्ताहाद् अनन्तरम् आगच्छतु तदा (iv) **बोधयिष्यामि**। सा पुनः एकसप्ताहाद् अनन्तरं महात्मानं (v) **पौत्रं** बोधयितुं प्रार्थितवती। महात्मा (vi) **पुनरेकदा** एकसप्ताहात् अनन्तरम् आगन्तुम् अकथयत्। महात्मनि श्रद्धावती सा पुनः उक्ते समये प्राप्तवती। अधुना महात्मा तं बालकम् अबोधयत् – वत्स! अत्यधिकं (vii) **गुडभक्षणं** योग्यं न भवति। केभ्यश्चन दिवसेभ्यः अनन्तरं सा वृद्धा महात्मानम् असूचयत् यत् तस्याः (viii) **पौत्रः** अधुना गुडभक्षणम् अत्यजत्। पुनः सा महात्मानम् अपृच्छत् यत् सः कथं वारद्वयं सप्ताहादनन्तरम् आगच्छतु इति अकथयत् यतः 'वत्स! अत्यधिकं गुडभक्षणं योग्यं न भवति।' इत्येतत् वाक्यं तु पूर्वमपि वक्तुं (ix) **शक्यते स्म**? तदा महात्मा अकथयत् यदा भवती प्रार्थितवती आसीत् तदा अहमपि बहु गुडभक्षणं करोमि स्म, अतः अन्यस्मै गुडत्यागाय वक्तुं मम अधिकारः न आसीत्। अहम् अभ्यासेन प्रयत्नपूर्वकं गुडत्यागम् अकरवम्। अतः अहं ततः परमेव बालकं बोधितवान् अपि च मम वचसः तस्मिन् प्रभावोऽपि जातः। वृद्धा अन्ये भक्ताश्च श्रद्धया (x) **नतमस्तकाः** अभवन्। | |
| | **अथवा** | |
| | **अधोलिखितसंवादे मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयन्त** 1×5=5<br><br>**परिधिः** - आद्ये! त्वम् अद्य अल्पाहारार्थं किम् आनीतवती?<br>**आद्या** - **(i) अहम् इडली-साम्भरखाद्यम् आनीतवती। उदित ! त्वं किम् आनयः?**<br>**उदितः** - अहम् ओदनं सूपञ्च आनीतवान्। परिधे! त्वं मध्यावकाशे भक्षणाय किम् आनयः?<br>**परिधिः** - **(ii) मम माता मह्यं रोटिकां आलुकस्य शाकं च दत्तवती। परम् अहं तद् न इच्छामि।**<br>**मीशा** - मम पार्श्वे आलुकस्य चिप्स् शीतलपेयं चास्ति। (iii) **किं भवत्यै शीतलपेयं रोचते?**<br>**परिधिः** - आम्, मह्यं शीतलपेयं रोचते।<br>**अभ्युदयः** -**(iv) किं विस्मृतं त्वया यत् शीतलपेयं, चिप्सादिकानि जङ्कभोज्यवस्तूनि स्वास्थ्याय हितकराणि** | |

| | | |
|---|---|---|
| | **न भवन्ति।**<br>**परिधिः -** यद् वस्तु अस्मभ्यं न रोचते, तत् वयं कथं खादेम?<br>**अभ्युदयः - (v) सर्वदा तथ्यमिदं स्मरणीयं यत् शुद्धं सात्त्विकं पौष्टिकं च भोजनमेव स्वास्थ्यरक्षकं भवति।**<br>**परिधिः -** भवता सत्यं कथितम्। अग्रे वयं यत् स्वास्थ्याय हितकरं भवेत् तदेव आनेष्यामः।<br>रचनात्मक-कार्ये वाक्यरचना प्रमुखा। अत्र अन्यानि अपि उत्तराणि भवितुं शक्नुवन्ति। | |
| **4.** | **निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत –** | 1×5=5 |
| | 1. वैभवः उच्चैः हसति।<br>2. यूयं किं पठथ?<br>3. बालकाः कथां श्रोष्यन्ति।<br>4. युवाम् उच्चैः मा वदतम्।<br>5. कृषकाः क्षेत्रं/क्षेत्राणि अगच्छन्/गतवन्तः।<br>6. अधुना आवां शयनं कुर्याव। / अधुना आवाभ्यां शयनं करणीयम्/कर्त्तव्यम्। | |
| | | |
| | **खण्डः - ग**<br>**अनुप्रयुक्तव्याकरणम् 20 अङ्काः** | |
| **5.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत-**<br>**(केवलं प्रश्नषट्कम्)** | 1×6=6 |
| | (i) धर्मान्न<br>(ii) अत्राप्यलोभः<br>(iii) मनुः + नाम<br>(iv) उल्लङ्घ्य<br>(v) तपः + तेपे<br>(vi) नैकेन<br>(vii) खलु + एतत् | |
| **6.** | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नपञ्चकम्)** | 1×5=5 |
| | (i) (ग) न अश्नन्<br>(ii) (क) पतिः च पत्नी च<br>(iii) (ग) सापराधम्<br>(iv) (क) पाण्डित्यसम्भृतमतिः<br>(v) (ख) दीर्घेण प्रयासेन<br>(vi) (क) प्राप्तं परिचयपत्रं यैः ते | |

| | | |
|---|---|---|
| 7. | अधोलिखित-वाक्येषु रेखाङ्कितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितं रूपं प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्) | 1x6=6 |
| | (i) (क) प्र+मद्+तव्यत्<br>(ii) (ख) व्यवस्थित+टाप्<br>(iii) (ग) प्र+सू+क्त<br>(iv) (ख) नयन्<br>(v) (ग) गुणी<br>(vi) (क) कथितवान्<br>(vii) (घ) प्र+आप्+क्त | |
| 8. | कोष्ठकप्रदत्तपदैः सह समुचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कृत्वा लिखत – (केवलं प्रश्नत्रयम्) | 1x3=3 |
| | (i) (क) फले<br>(ii) (ग) प्रज्ञया<br>(iii) (ख) मुञ्जाय<br>(iv) (घ) स्वाध्यायात् | |
| | **खण्डः – घ भाग - I**<br>**पठितांशावबोधनम् 25 अङ्काः** | |
| | | |
| 9. | अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत - | 5 |
| | अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | ½x2=1 |
| | (क) श्मशानभूमौ<br>(ख) कापालिकः<br>(ग) शिवप्रसादेन | |
| | आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 1x2=2 |
| | (क) वत्सराजः बुद्धिसागरं नत्वा शनैः शनैः प्राह - तात! मया भोजराजो रक्षित एवास्ति।<br>(ख) 'योगिना भोजो जीवितः इति कथा लोकेषु प्रसृता।<br>(ग) मुञ्जः कापालिकं प्रार्थयत् - हे योगीन्द्र! मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति। | |
| | इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) | 1x2=2 |
| | (क) वत्सराजः<br>(ख) हतस्य<br>(ग) वह्निः | |

| | | |
|---|---|---|
| 10. | अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत - | 5 |
| | अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | ½x2=1 |
| | (क) कांस्यम्<br>(ख) अजस्रम्<br>(ग) मितप्रभाषी | |
| | आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 1x2=2 |
| | (क) अल्पज्ञः पुरुषः निरन्तरम्/अजस्रं प्रलापं करोति।<br>(ख) सुवर्णं कांस्यवत् नादं न करोति।<br>(ग) अल्पज्ञः अजस्रं प्रलपति परं पण्डितः मितप्रभाषी भवति। | |
| | इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) | 1x2=2 |
| | (क) अजस्रम्<br>(ख) पुरुषः<br>(ग) अतितराम् | |
| 11. | अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत - | 5 |
| | अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | ½x2=1 |
| | (क) शिशुभ्यः<br>(ख) अभिरुचिम्<br>(ग) जीवनयात्रायाम् | |
| | आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 1x2=2 |
| | (क) कुण्डला विहस्य मदालसां कथयति - यदि त्वं शीघ्रमेव पतिगृहं गमिष्यसि तदा एकाकिनी भविष्यामि।<br>(ख) मदालसा जीवनपथे चलितुं स्वयं समर्था अस्ति।<br>(ग) सङ्गीतसाहित्यमाध्यमेन ब्रह्मविद्यां सरसां विधाय मदालसा बहुभ्यः शिशुभ्यः शिक्षणं प्रदास्यति। | |
| | इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) | 1x2=2 |
| | (क) उपायः<br>(ख) त्वम्<br>(ग) विहस्य | |
| 12. | अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत – | 1x3=3 |
| | **भावार्थः –**<br>(i) सहस्रैः | |

| | | |
|---|---|---|
| | (ii) सज्जनताम्<br>(iii) निमग्नः<br>**अथवा** | |
| | प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत- | 1×3=3 |
| | (क) (i) मृत्योः अनन्तरम् एषा पृथिवी केनापि सह न गतवती निश्चितमेव त्वया सह गमिष्यति।<br>(ख) (ii) गुणवता पुत्रेण एव माता निर्भया भवति।<br>(ग) (iii) शोकस्य समये लक्ष्मणः युद्धाय तत्परः अस्ति। | |
| 13. | अधोलिखित- श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानपूर्तिं कुरुत – | 1×3=3 |
| | **अन्वयः** – (i) पार्थिवस्य (ii) नवनृपतिविमर्शे (iii) भ्रातरः | |
| 14. | ‘क’ स्तम्भस्य वाक्यांशस्य ‘ख’ स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत - | ½×4=2 |
| | **‘क’ स्तम्भः** — **‘ख’ स्तम्भः**<br>(i) ज्ञाने मौनं क्षमा शक्तौ — (ग) त्यागे श्लाघाविपर्ययः।<br>(ii) तेजः क्षमा धृतिः — (क) शौचमद्रोहो नातिमानिता।<br>(iii) आह्लादितं कुलं सर्वम् — (घ) यथा चन्द्रेण शर्वरी<br>(iv) यशसे विजिगीषूणाम् — (ख) प्रजायै गृहमेधिनाम् | |
| 15. | अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चित्वा लिखत – | ½×4=2 |
| | (i) ऐश्वर्याय<br>(ii) लक्ष्मणेन<br>(iii) वार्तालापः<br>(iv) श्रीरामः | |
| | **खण्डः – घ भागः - ii**<br>**सामान्यसंस्कृतसाहित्यपरिचयः 10 अङ्काः** | |
| 16. | अधोलिखित-प्रश्नानाम् उत्तराणि लिखत- (केवलं प्रश्नत्रयम्) | 1×3=3 |
| | (i) श्रीमद्भगवद्गीता<br>(ii) अनुशासनम्<br>(iii) दौवारिकस्य निष्ठा<br>(iv) कालिदासः | |

| | | |
|---|---|---|
| 17. | मञ्जूषायाः समुचितं पदं चित्वा रिक्तस्थानानि पूरयत – (केवलं प्रश्नत्रयम्) | 1×3=3 |
| | (i) महाकाव्यम्<br>(ii) अर्थगौरवम्<br>(iii) पदलालित्यम्<br>(iv) आख्यायिका | |
| 18. | समुचितं मेलयाम । | 1×4=4 |
| | **भागः - क** / **भागः - ख**<br>(i) उरुभङ्गनाटकम् — (क) भासः<br>(ii) मृच्छकटिकम् — (ख) शूद्रकः<br>(iii) मुद्राराक्षसम् — (ग) सप्ताङ्कात्मकं नाटकम्<br>(iv) मालतीमाधवम् — (घ) भवभूतेः कृतिः | |

**************************************